# Shri Ramastuti Ramachandra Ashtakam

# શ્રીરામસ્તુતિ રામચન્દ્રાષ્ટકમ્

## Document Information

Text title : Shri Ramastuti Ramachandra Ashtakam

File name : rAmastutirAmachandrAShTakam.itx

Category : raama, aShTaka, stuti

Location : doc_raama

Author : Swami Umeshvaranand Tirth

Proofread by : Paresh Panditrao

Description/comments : Ganga Mahatmya And Stuti Ratnavali By Swami Umeshvaranand Tirth

Latest update : July 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# શ્રીરામસ્તુતિ રામચન્દ્રાષ્ટકમ્

રામં શ્યામં રાજીવનેત્રં રમણીયં
　　સીતાકાન્તંશાન્તન્નિત્યં સુખકન્દમ્ ।
શોભાદિવ્યં મરકતવર્ણં નૃપતીશં
　　વન્દે રામં નવનલિનાભમવધેશમ્ ॥ ૧॥

નાનાદ્રવ્યૈર્પૂજિતનિત્યં શિવપૂજ્યં
　　નાનાશાસ્ત્રૈર્વન્દિતનિત્યં સુખકન્દમ્ ।
નાનાભોગૈર્શોભિતનિત્યં સમસેવ્યં
　　વન્દેરામં ધરણીજાયાસમ સેવ્યમ્ ॥ ૨॥

રામં નિત્યં સાયક ચાપં કરધારિં
　　શોભા પુઞ્જં રત્નકીરીટં શિરસેવ્યમ્ ।
રામંરાજ્યે રાજવિરાજં નૃપશ્રેષ્ઠં
　　વન્દે રામંશ્યામલકાયં સુખપુઞ્જમ્ ॥ ૩॥

દણ્ડકવિપિને ત્રાણવિહીન પ્રચલન્તં
　　લક્ષ્મણ સીતાસહચરનીતં વિચરન્તમ્ ।
ના ના વૃન્દૈ ઋષિજન સહિતૈર્ભજનીયં
　　વન્દે રામં નિર્ગત કામં સુખધામમ્ ॥ ૪॥

રાવણ શત્રું વાનરમિત્રપ્રતિપાલં
　　દનુજવિનાશિઞ્જનસુખરાશિં સુખધામમ્ ।
અનુજ સહગમનં સીતાસહરમણં
　　મારુતસુતસેવ્યં નાશકજન વ્યસનં પ્રણમામિ ॥ ૫॥

શાન્તં દાન્તં શોકવિહીનં સકલત્રં
　　મુનિજનપાલક ભવભય નાશક ।
સુમધુર ધરણીતલ અવતાર ધરં
　　શ્રીરામં દશરથ તનયં પ્રણમામિ ॥ ૬॥

રામં નિત્યં વાઞ્છિત ફલદં પ્રણમામિ
　　રામં નિત્યં લક્ષ્મણ પૂજ્યં નૃપશ્રેષ્ઠમ્ ।
માયાતીતં કાલાતીતં ત્રિગુણેશં
　　નિર્ગુણમેકં શાન્તં શુદ્ધં પ્રણમામિ ॥ ૭॥

શ્યામલકાયં નિર્મિતમાયં પ્રણમામિ
　　જાપ્યન્નિત્યં તવશુભ નામં સુખપૂર્ણમ્ ।
વન્દે રામં શ્યામલકાયં ધરણીશં
　　વન્દે રામં શતદલનેત્રં સતતં ત્વમ્ ॥ ૮॥

સાષ્ટાઙ્ગ પ્રણામ-રામં નમામિ મનસા વચસા ચ નિત્યં
　　રામં નમામિ શિરશા ઉરસાતથૈવ ।
રામં નમામિપદજાનુભુજૌદૃશાચ
　　રામં નમામિ સતતં ભુવનેશમીડ્યમ્ ॥ ૯॥

ઇતિ શ્રી સ્વામી ઉમેશ્વરાનન્દતીર્થવિરચિતં શ્રીરામાષ્ટકં સમ્પૂર્ણમ્ ।

અપને સબ કામ ભૂલકર સદા ઈશ્વર કો સ્મરણ કરતે
　　રહો – “સન્ત વાણી”
સચ્ચા સન્ત ઈશ્વર કી ગોદ મેં ખેલતા મુસ્કરાતા સુન્દર
　　બાલક હૈ – “સન્તવાણી”
અપની પ્રિય સે પ્રિય વસ્તુ કા અપને પ્રિય પરમાત્મા કે લિએ ત્યાગ કરો,
યહી પ્રભુ પ્રેમ કા લક્ષણ હૈ – “સન્તવાણી”
ભક્ત જબ પ્રભુ કા સબ પ્રકાર સે આશ્રય લેતા હૈ તભી પરમેશ્વર
　　ઉસકી રક્ષા અપને હાથ મેં લે લેતા હૈ – “સન્તવાણી”
અઙ્કાધિરૂઢં શિશુગોપગૂઢમ્, સ્તનં ધયન્તં કમલૈક કાન્તમ્ ।
સમ્બોધયામાસ મુદાયશોદા, ગોવિન્દ દામોદર માધવેતિ ॥

(સ્તોત્ર સે. )

Proofread by Paresh Panditrao

*Shri Ramastuti Ramachandra Ashtakam*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*